श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये षोडशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये षोडशं दशकम् ॥

## नरनारायणावतारवर्णनं, दक्षयागवर्णनं च

दक्षो विरिञ्चतनयोऽथ मनोस्तनूजां
    लब्ध्वा प्रसूतिमिह षोडश चाप कन्याः।
धर्मे त्रयोदश ददौ पितृषु स्वधां च
    स्वाहां हविर्भुजि सतीं गिरिशे त्वदंशे ॥ 16.1 ॥

मूर्तिर्हि धर्मगृहिणी सुषुवे भवन्तं
    नारायणं नरसखं महितानुभावम्।
यज्जन्मनि प्रमुदिताः कृततूर्यघोषाः
    पुष्पोत्करान् प्रववृषुर्नुनुवुः सुरौघाः ॥ 16.2 ॥

दैत्यं सहस्रकवचं कवचैः परीतं
    साहस्रवत्सरतपस्समराभिलव्यैः।
पर्यायनिर्मिततपस्समरौ भवन्तौ
    शिष्टैककङ्कटममुं न्यहतां सलीलम् ॥ 16.3 ॥

अन्वाचरन्नुपदिशन्नपि मोक्षधर्मं
    त्वं भ्रातृमान् बदरिकाश्रममध्यवात्सीः।
शक्रोऽथ ते शमतपोबलनिस्सहात्मा
    दिव्याङ्गनापरिवृतं प्रजिघाय मारम् ॥ 16.4 ॥

कामो वसन्तमलयानिलबन्धुशाली
    कान्ताकटाक्षविशिखैर्विकसद्विलासैः।

विध्यन्मुहुर्मुहुरकम्पमुदीक्ष्य च त्वां
    भीरुस्त्वयाऽथ जगदे मृदुहासभाजा ॥ **16.5** ॥

भीत्याऽलमङ्गज वसन्त सुराङ्गना वो
    मन्मानसं त्विह जुषध्वमिति ब्रुवाणः।
त्वं विस्मयेन परितः स्तुवतामथैषां
    प्रादर्शयः स्वपरिचारक कातराक्षीः ॥ **16.6** ॥

सम्मोहनाय मिलिता मदनादयस्ते
    त्वद्दासिकापरिमलैः किल मोहमापुः।
दत्तां त्वया च जगृहुस्त्रपयैव सर्व -
    स्वर्वासिगर्वशमनीं पुनरुर्वशीं ताम् ॥ **16.7** ॥

दृष्ट्वोर्वशीं तव कथां च निशम्य शक्रः
    पर्याकुलोऽजनि भवन्महिमावमर्शात्।
एवं प्रशान्तरमणीयतरावतारात्
    त्वत्तोऽधिको वरद कृष्णतनुस्त्वमेव ॥ **16.8** ॥

दक्षस्तु धातुरतिलालनया रजोऽन्धो
    नात्यादृतस्त्वयि च कष्टमशान्तिरासीत्।
येन व्यरुन्ध स भवत्तनुमेव शर्वं
    यज्ञे च वैरपिशुने स्वसुतां व्यमानीत् ॥ **16.9** ॥

क्रुद्धेशमर्दितमखः स तु कृत्तशीर्षो
    देवप्रसादितहरादथ लब्धजीवः।
त्वत्पूरितक्रतुवरः पुनराप शान्तिं
    स त्वं प्रशान्तिकर पाहि मरुत्पुरेश ॥ **16.10** ॥

॥ इति श्रीमन्नारायणीये षोडशं दशकं समाप्तम् ॥